षिटाधिमावली

1894

445
388
SAHITYA DEEPIKA
VIDYA PEETHA PAVARATTY

श्री

राधामाधवापरपर्यायं

विटविभावरी

नाम खण्डकाव्यम्

श्रीवञ्चिमहाराज्ञीवल्लभश्रीमत्केरळवर्मपर्यन्तपतेः
प्रियभागिनेयेन प्रथमान्तेवासिना च

अ. रा. राजराजवर्मणा

(अधुना एं. ए. उपाधिधारिणा) बालकविना

प्रणीतम्.

मातुलसूनुना(अधुना स्यालेन बि. ए. उपाधिधारिणा)

म. उदयवर्मणा

विरचितया चन्द्रिकाख्यया व्याख्यया संवलितम्

...ा । अ-
...ुषा गुरूणाम्॥व्याख्यां नापेक्ष-

विज्ञानचिन्तामणिमुद्रालये
...दस्मादृशामेषा किञ्चिज्ज्ञानां क्षु-

मुद्रापकः ए. राम...
...कविर्विटविभावरीनामकं खण्डकाव्यं

१८९४.
...रूपस्य स्वप्रबन्धस्य स्वतो मङ्गलात्मक-
...रानपेक्षतया आशीर्नमस्क्रियादिरूपं त-

855

श्री

विटविभावरी नाम

खण्डकाव्यम्

प्रारभ्यते

प्रथमो यामः ॥

जातु सायमतुषारदीधितौ पश्चिमांबुधिविलंबिमण्डले ।
श्रीपतिः श्रितकाळिन्दजातटः पार्श्वगं सुहृदमेवमब्रवीत् ॥ १ ॥

व्याख्यानपीठिका

कलये हृदि कुलमातस्त्रिदशेश्वरवन्द्यमंघ्रिपद्मन्ते। करुणां कुरु परिपूर्णामस्मिन् भक्ते निरालंबे ॥ श्रीमत्कोलनृपालविश्रुतमहावंशोत्थशाखाशतेष्वौन्नत्यस्पृशि जात एष कुहचित् कोणे करीरांकुरः । पर्पक्षोणिपराजराजसुधियः पैतृष्वसेयस्य मे काव्यं नव्यगुणं गुरोर्गुरुगिरो व्याख्यातुमद्यारभे ॥ क मल्लिनाथादिबुधेन्द्रमेधा प्रज्ञा च मे क प्रतिभाविदूरा । अनुग्रहः केवलमाश्रयो मे शिष्योदयौत्सुक्यजुषां गुरूणाम् ॥ व्याख्यां नापेक्षते विज्ञो लब्धाप्यज्ञस्य सा मुधा । तस्मादस्मादृशामेषा किञ्चिज्ज्ञानां कृते कृता ॥

अथ तत्रभवान् श्रीराजराजवर्मकविर्विटविभावरीनामकं खण्डकाव्यं चिकीर्षुः श्रीवासुदेवलीलानुवर्णनरूपस्य स्वप्रबन्धस्य स्वतो मङ्गळात्मकस्य विघ्नविघाताद्यर्थकमङ्गळान्तरानपेक्षतया आशीर्नमस्क्रियादिरूपं त-

दृश्यतामिह चिरायितोऽप्ययं वासरोऽद्य परिहीयते शनैः ।
सन्निधित्सति च बन्धुरं महः सान्धिवेलमतिवेलपेशलम् ॥ २ ॥

अस्तशैलशिखराग्रमण्डनं मण्डलं वहति चण्डरोचिषः ।
पाशपाणिपुरगोपुरस्फुरच्छातकुम्भमयकुम्भविभ्रमम् ॥ ३ ॥

मानिनीहृदयमानभेदनो मादृशेष्वदयमानमानसः ।
वाति गन्धवह एष मन्थरं जातिगन्धवहनश्रमालसः ॥ ४ ॥

सामिसंकुचितपद्मलोचना हीयमानकळहंसकस्वना ।
उन्मुखी स्वपिति पद्मिनी शनैः कामिनीव सुरतक्लमालसा ॥ ५ ॥

दक्त्वैव विभावरीसंज्ञानुगुणं माधवकृतसन्ध्यावर्णनरूपं वस्त्वेव निर्दिशति । जात्विति सायं प्रदोष मान्तमव्ययं ॥ अत्रेदमवधेयं। कदाचित् काळिन्दीतटारामान्तर्गतलतागृहे राधया दत्तसंकेतो भगवान् मुकुन्दः श्रीदामनामानं सुहृदं तत्र पीठमर्दकृत्यानिर्वहणाय नियुज्य सुदामसंज्ञितेन सुहृदन्तरेण सह काळिन्दीतट एव कथमपि दिनमतिवाहयन् सन्ध्यागमकुतुकितस्तच्छ्रियं सखायं प्रति वर्णयतीति।एतच्च द्वितीययामावसाने स्पष्टीभविष्यति ॥ १ ॥ परिहीयते परिक्षीणो भवति कर्मकर्तरि लट्. सन्निधित्सतीत्यासन्नार्थे दधातेस्सन्। सान्धिवेलं सन्धिवेलायां भवं. “सन्धिवेला....” (४-३-१६) इत्यण्। ॥ २ ॥ पाशपाणिर्वरुणः. शातकुंभं सुवर्णं ॥ ३ ॥ जातीति भारवाहिनः खलु मन्दमेव चरन्ति।। ४ ॥ सामिसंकुचितं अर्द्धनिमीलितं। हीयमानः कळहंसकस्वनो राजहं-

उद्गतोद्गणमरीचिबुद्बुदं बिंबमंभसि रवेर्निमज्जति ।
सायमंबुहरणाय कान्तया पूर्यमाण इव पौरटः कुटः

कुत्रचित् प्रविरळाः क्वचिद्घना मांसळाः कुहचनाणवः क्वचित् ।
अंकुरन्ति दिवि तारकाः क्रमाल्लासिकास्य इव घर्मबिन्दवः ॥ ७ ॥

प्रोषितेऽर्यमाणि वल्लभे दिशः क्षामविक्लवमलीमसत्विषः ।
मन्थरश्वसनमात्रलक्षिता म्ळानतां दधति निष्प्रभैर्मुखैः ॥ ८ ॥

किं न पश्यसि हरेर्हरित् पुनर्बिभ्रती सपादि पाण्डुरं मुखम्।
दर्शनीयनिखिलाकृतिः क्रमाद्गर्भगेन शशिना विभाव्यते ॥ ९ ॥

सध्वनिर्य्यस्यां, हीयमानः कळो हंसकस्वनो मञ्जीरशिञ्जितं यस्या इति च "हंसकः पादकटक" इत्यमरः. उन्मुखी ऊर्ध्वमुखी नायकाभिमुखीतिच। स्वपिति निद्राति "रुदादिभ्यस्सार्वधातुक" (७-२-७६) इतीट्. ॥ ५ ॥ पौरटः सुवर्णमयः कुटो घटः. अत्र सन्ध्यावर्णने उपमानां उत्कण्ठितमाधववाक्यान्तर्गतानां प्रकृतानुगुण्यं सूक्ष्मदृशो विभावयन्तु ॥ ६ ॥ विरळाः स्तोकाः.घनाः सान्द्राः. मांसळाः स्थूलाः . अणवः कृशाः. अंकुरन्ति अंकुरवदुद्गच्छान्ति ॥ ७ ॥ मन्थरेति मन्दमारुतप्रेषणमात्रानुमेयसत्ताकाः श्वासमात्रावशिष्टजीवीता इति च ॥ ८ ॥ हरेर्हरित् प्राची। गर्भगेन अन्तर्गतेन आसन्नोदयेनेत्यर्थः भ्रणतां गतेनेतिच॥ ९ ॥ लुप्येति कर्मकर्त्तरि शानच्। चञ्चलप्रकृति प्रतिक्षणभिन्नरूपं अधीरस्वभावं च ॥ १० ॥ तिर्यञ्चोऽप्येवं मन्मथाज्ञामनुवर्त्तन्ते किमुत म-

लुप्यमानभृशतापमुन्मिषद्रागमुद्धणतमोमलीमसम्।
चञ्चलप्रकृति शर्वरीमुखं मानसस्य मम साम्यमश्नुते ॥ १० ॥

कोकलोकमिह लोकयाऽऽकुलं शोकपावकविपाकविह्वलम्।
नातियाति बत तिर्यगप्यसौ मीनकेतनमहीनशासनम् ॥ ११ ॥

ईषदुन्मिषितरोषरूषितं कीर्णकुन्तळभरं वधूमुखम्।
स्मारयन्नयमुदेति चन्द्रमा धैर्यसारहरणाय कामिनाम् ॥ १२ ॥

स्वैरिणीजननिसर्गवैरिणी चन्द्रिका क्रमधृतातिसान्द्रता।
उन्नतोत्कलिकमानसस्य मे नेत्रयोर्न रुचये भवत्यसौ ॥ १३ ॥

पश्य काममभिरामकौमुदीस्वादिमावगमकोविदा इमे।
शान्तभीषणतृषः शकुन्तयः केऽपि केळिकुतुकानि कुर्वते ॥ १४॥

नुष्या इति भावः महीनो भूपतिः ॥ ११ ॥ रोषरूषणमुदयरागस्था-नीयं कुन्तळभरः कळंकस्थानीयश्च ॥ १२ ॥स्वैरिणीति। कुलटाजनस्वैरसञ्चारबाधिनी। उन्नतेति अत्युत्कण्ठितमनसः "उत्कण्ठोत्कलिके समे,, इत्यमरः। न रुचये भवति उद्वेजिका भवतीत्यर्थः ॥ १३ ॥ कौमुदीस्वादिमावगमकोविदाः केपि शकुन्तयश्चकोराः ॥ १४ ॥ चन्द्रिकेत्यादि "तेन वित्तश्चुञ्चुप्चणपौ,, (५ -२ - २६) ॥ १५ ॥

अथ कविश्चन्द्रवर्णनद्वारेव कथाबीजमुपन्यस्यति। चार्वेति। एष राधासंकेतभूतः। चिराभिवांछितं चिरप्रार्थितं ॥ १६ ॥ चञ्चळीकेत्यादि आ-

चन्द्रिकाऽऽचमनचुंचुचञ्चव श्चारुचञ्चलदृशश्चकोरकाः ।
पञ्चबाणशरपञ्जरोदरे पातयन्ति परितो मनो मम ॥ १५ ॥

चारुचन्द्रकरचर्चितोदरो मंजुगुञ्जदलिपुंजमेदुरः ।
कुञ्ज एष कुरुते कुतूहलं चेतसो मम चिराभिवाञ्छितम् ॥ १६ ॥

पश्य मां पवनचञ्चलाञ्चलैः पल्लवांगुलिदलैः स्मरातुरम् ।
चञ्चलीककलनिस्वनोदितस्वागतं स्वयमिवाह्वयत्ययम् ॥ १७ ॥

शीतदीधितिमरीचिवीचिभिर्भासुराभिरभितः कृताप्लुतिः ।
मन्महेऽयमपि मन्महागमं सज्जपुष्पशयनः प्रतीक्षते ॥ १८ ॥

प्रेयसीवदनचन्द्रमण्डलादुच्चलन्नमलचान्द्रिकाङ्करः ।
उन्मदामिह कदानु कौमुदीं प्रापयेद्दिवसदीपिकादशाम् ॥ १९ ॥

ह्वानक्रियाविशेषणमिदं । चञ्चलीका भ्रमराः "इन्दिन्दिरश्चञ्चलीको लोलंबो बंभरश्च सः" इति त्रिकाण्डशेषः ॥ १७ ॥ मन्महागमं मदुत्सवागमं राधागमनमिति भावः । "मन्महे वयमिवायमप्यहो! दीक्षितः प्रियतमां प्रतीक्षते " इत्यपि पाठः । यथाऽहं सज्जो राधां प्रतिपालयामि तथा निकुञ्जोऽपि किं तामेव प्रतीक्षते इत्युत्प्रेक्षा ॥ १८ ॥ प्रेयसीत्यादि । प्रिया कदाऽत्राऽऽगमिष्यतीति पिण्डितोऽर्थः ॥ १९॥ चन्द्रिकेति । चन्द्रिकैव तिमिरं तेन पूरितान्तरं।अभिसारिकाणां हि चन्द्रिका तिमिरायते । यथाऽह मङ्खकः " आलि! कल्पय पुरः करदीपं च-

चन्द्रिकातिमिरपूरितान्तरं स्वैरिणीचरणदूरदुश्चरम् ।
वीक्ष्य मार्गमभिसारसाहसे कातरा किमु भवेत् कृशोदरी ॥ २० ॥

मार! दुर्ललित एव ते सुहृच्चन्द्रमास्त्वदनुजीविनं जनम् ।
सेवनाय तव यान्तमध्वनि द्रोग्धुमिच्छति निवार्यतां द्रुतम् ॥२१ ॥

आदिमोऽयमभिसर्तुमुद्यमो दुस्त्यजं गुरुजनानुवर्तनम् ।
यातयाममपि नाथ यौवनं किं करोतु मदनार्दितापि सा ॥ २२ ॥

उत्तरोत्तरपदे महत्तरं विघ्नसंघमनुधावदाविलम् ।
मामकीनमयि मानसं किमप्यन्धकूपकुहरं विगाहते ॥ २३ ॥

इत्थमुत्सुकमुदीर्य तत्क्षणस्फायमानमदने मधुद्विषि ।
दूनचेतसि दुरन्तचिन्तया श्रान्तवाचि वच आददे सखा॥ २४ ॥

न्द्रमण्डलमिति प्रथितेन। नन्वनेन पिहितं मम चक्षुर्मक्षु पाण्डुरतमोगु-
ण्ठकेन „ (श्रीकण्ठचरिते ११ सर्गे ९२ श्लो)दूरदुश्चरं अत्यन्तदुश्चरम्॥
॥ २० ॥ दुर्ललितो दुरहंकृतः । सेवकाः प्रभुसुहृद्भिः प्रपीडिताः प्र-
भुनेवाक्रन्दन्ति खलु ॥ २१ ॥ गुरुतरविघ्नान्तरसद्भावात् मदनप्रार्थ-
नमपि व्यर्थमित्याशंकते । आदिम इति । यातयामं चिरप्रवृत्तं "जीर्णं
च परिभुक्तं च यातयाममिदं द्वयं" इत्यमरः ॥ २२ ॥ अनुधावत् प-
र्यालोचयदित्यर्थः । आविलं कलुषं विघ्नसंघविशेषणं वेदम् ॥ २३ ॥
सखा सुदामा ॥ २४ ॥ विमनायमानतामन्तस्तापम् ॥ २५ ॥

अन्तरायचयचिन्तनैरलं सन्त्यजाऽऽशु विमनायमानताम् ।
राधिकापि मदनाधिबाधिता पारयिष्यति चिरायितुं न सा ॥ २५ ॥

सीमलंघनविशृंखलोच्चलन्मीनलांछनरसौघपूरिता.
किं करिष्यति धुनी च कामिनी स्वप्रियाभिसरणोद्यमाद्दते ॥ २६ ॥

अष्टमूर्तिहरिविष्टरश्रवःस्रष्टृमुख्यजयदृष्टवैभवे ।
शम्बरारिविशिखेऽपि वन्ध्यतां शंकमान इह लज्जसे न किम्॥२७॥

व्यर्थशंकितशतानि सन्त्यज स्वस्थतां भज यथोक्तमाचर ।
कृत्यमन्यदिह नावशिष्यते सूत्रधारपदभाजि मन्मथे ॥ २८ ॥

सीमेति । सीमलंघनेन मर्यादातिक्रमणेन विशृंखलं यथा तथा उच्चलन् यो मीनलांछनरसो मन्मथविकारस्तस्यौघेन पूरिता, अन्यत्रतीरोत्लंघनेनि-र्गळेन उच्चलन्मीनांकितेन च जलप्रवाहेग पूरिता। धुनीपक्षे प्रियस्सागरः। उद्यमादिति " अन्याऽऽरादितरर्ते...." (२-३-२९) इति पञ्चमी ॥ २६ ॥ अष्टमूर्तिः श्रीकण्ठः " धरांभोग्निमरुद्व्योमसखेशेन्द्वर्कमूर्तिभिः " इत्युक्तेः । हरिरिन्द्रः । विष्टरश्रवा विष्णुः । उक्तं हि हरिणा " शंभुस्वयंभुहरयो हरिणेक्षणानां येनाक्रियन्त सततं गृहकुम्भदासाः " इति ॥ २७ ॥ यथोक्तं यया कान्तया सन्दिष्टं ॥ २८ ॥ रोहिणीति । इदमद्य तुलाभारप्रबन्धेऽपि दृश्यते । वश्यवाचोऽपि कवयः कदाचित् केनापि कुतुकेन एकत्रोक्तमेवार्थं असकृदावर्तयन्ति । यथा भवभूतिः " नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्ध्नि स्थितिर्न चरणैरवताडनानि " इत्यदो उत्तररामचरिते प्रथमांके मालतीमाधवनवमांके च

रोहिणीरमणकान्तिधोरणीरामणीयकतृणीकृतिक्षमाम् ।
पास्यसि प्रियतमास्यसम्पदं कौमुदीं द्रुतममी इव द्विजाः ॥ २९ ॥

स्वस्थचित्त इह तद्भवान् क्षणं प्लक्षमूलतळिमे प्रतीक्षताम् ।
तत्प्रवृत्तिमुपलभ्य सत्वरं यावदेष विनिवर्तितुं यते ॥ ३० ॥

विस्माषींर्मा स्म घोरस्मरशरविवशो जातु सन्दिष्टकृत्यं
संकल्पानां विकल्पेष्ववहितमनसा रक्षणीयो विवेकः ।
संकेतान्तःप्रवेशं न च कुरु दयितादूतमप्राप्य मोहा-
दित्थं दत्वोपदेशान् प्रियसखसविधान्निर्गतोऽभूत्सुदामा ॥ ३१ ॥

आत्मानं तदनु सुहृद्वचोनुरोधात्संस्तभ्य क्षणमथ विश्लथाङ्गसन्धिम् ।
गोविन्दोऽप्याधिवटमूलमुत्सुकाक्षः प्रेयस्यागमनमहं प्रतीक्षते स्म ।३२।

॥ इतिविटविभावर्यां प्रथमो यामः ॥

न्यबध्नात् । आस्यसम्पदं वदनशोभां । अमी इव इति " अदसो मात् (१-१-१२) इति प्रगृह्यत्वादसन्धिः ॥ २९ ॥ इहेत्यङ्गुल्या निर्दिश्यते । तलमेव ताळिमं ॥ ३० ॥ विस्माषींरिति । माङ्योगादडभावः । सन्दिष्टेति एवमेवं त्वया विधेयमिति कान्तया सन्दिष्टमर्थं ।

रक्षणीय इति संकल्पदष्टदयिताऽह्वानादिकं न कार्यमित्यर्थः । अप्राप्येति उद्यानपालादिभ्यो रहस्यगोपनार्थमिदं । नूनमुपदेशकुशलोऽयं सुदामा । यदयं मदनातुराणां कामुकानां क्वचित् संभाव्यान् प्रमादप्रकारान् स्पष्टं प्रतिपाद्याऽवहितमनसा माधवेन स्थातव्यमित्यनुशास्ति ॥ ३१ ॥ आगमनमहमागमोत्सवम् ॥ ३२ ॥

॥ इति विटविभावरीव्याख्यायां चन्द्रिकाख्यायाम् ॥

॥ प्रथमो यामः ॥

अथ द्वितीयो यामः

चिन्तापयोधौ विहितावगाहः सन्तापितोऽस्त्रानलपञ्चकेन ।
एकाग्रचेता वटवृक्षमूले ध्याने न्यमांक्षीत् स विटस्तपस्वी ॥ १ ॥

ध्यानैकताने हृदये तदीये मरीचिकावीचिवदाविरासन् ।
असन्निधानेऽप्यमृतायितानि प्रियाचरित्राण्यथ तानि तानि ॥ २ ॥

तपस्वी शोच्यः मुनिश्च। यथा कश्चिन्मुनिः पञ्चाग्निमध्ये स्थित्वा सप्रणिधानं तपः करोति तथाऽयमपि पञ्चशरानलतापितो दयितां ध्यातवानित्यर्थः॥ १॥ मरीचिकावीचिवत् मृगतृष्णातरङ्गपरम्परा इव । असन्निधानेति । विचार्यमाणदशायामप्यमृतोपमानि ॥ २ ॥ अथ माधवमनस्यंकुरितानि कानिचित् प्रियाचरित्राण्येव एकादशभिर्वर्णयति । अद्यापीति । पदेति तृतीयान्तं । अत्र मदनोन्मत्तस्य माधवस्य चिन्तासु चित्तचापल्यद्योतनार्थ-

अद्यापि स्फुरतीव मे धुरि दृशोर्यच्चञ्चलापाङ्गया
वेश्मोपान्तविभूषणायितपदा संवीक्ष्य मामध्वनि ।
व्यावृत्यास्यविधुं विलम्ब्य पदयोर्मृन्मार्जनायासकृत्
सोपानोपरि पादघातमपदिश्यालोकितोऽहं मुहुः ॥ ३ ॥

इह तरणिसुतायां जातु नौकाविहारे-
ष्वधितरणि निषण्णा भूषयन्ती गवाक्षम् ।
प्रणयमसृणभावैरीक्षितैः पक्ष्मलाक्षी
तटनिकटगतं मां मोहयन्ती जगाम ॥ ४ ॥

तदैवास्यां किञ्चित्कुटिलितगतिं वीक्ष्य तटिनीं
प्रसार्याङ्गं मद्भुजावधि करतलक्षाळनमिषात् ।
तिरः पश्यन्त्यां मां पुनरपि वयस्यास्समहसन्
पदेऽन्यस्मिन्नेषा पतति सरितीति श्रितदयाः ॥ ५ ॥

क श्लोकानां वृत्तवैचित्र्यं इति ध्येयम् ॥ ३ ॥ तरणिसुता काळि-न्दी । अधितरणि नौकायाम् । विभक्त्यर्थेऽव्ययीभावः । "द्युमणिस्तर-णिर्मित्र" इति "स्त्रियां नौस्तरणिस्तरिः" इति चामरः । गवाक्षं त-रणेरेव । ॥ ४ ॥ तदैव नौकाविहारावसरएव । पदेऽन्यस्मिन् एकं-पदमतिक्रम्येत्यर्थः । पततीति वर्तमानसामीप्ये भविष्यति लट् । काळि-न्द्या अराळगमनत्वात्तटगतस्य ममादृश्यत्वप्रसङ्गे नदीजले पाणिप्रक्षाळ-नार्थं किल पूर्वकायं गवाक्षद्वारा बहिः प्रसार्य भूयोऽपि मामेव निभाद

अकाण्डबन्धो भवतेऽयमञ्जलिः सांर्त्तिटमिण्डम मण्डपोत्तम ।
यथा तदाऽऽसा किल यस्य ते क्षितौ प्रियाकटाक्षाञ्जलितरप्रतीक्षता ॥

अन्येद्युराकुञ्चितकण्ठनाळं प्रोष्यागताया मधुरस्मितं तत् ।
अपाङ्गमालामयकीलनालैरद्यापि मे चेतसि लातमास्ते ॥ ७ ॥

तस्यास्तन्नचिरातियातरजनीवृत्तस्मृतेरुन्मिषत्
संरुद्धं गुरुसन्निधानभयतः कृच्छ्रेण मय्येपथम् ।
विश्रान्तद्युति सृक्कणोः प्रसरणादाश्वेतितोष्ठान्तिकम्
साकूतं मधुरस्मितं नयनयोरद्यापि मे तिष्ठति ॥ ८ ॥

एकान्तभाजमुपलभ्य रजस्वलान्तां हन्त स्मराम्यधिगतावसरः परेद्युः ।
आदर्शबिम्ब इव वित्तमवाप्य निस्वः किं किं न चापलमकार्षमपूर्णकामः ।

यन्ती सा सखीभिरुक्तप्रकारेणाहास्यतेति संक्षिप्तोऽर्थः । सख्युपहासश्रवणं माधवस्य दूरस्थितत्वादसङ्गतमिति चेत् वयस्या माधवस्यैव सखाय इति कल्प्यताम् ॥ ५ ॥ ६ ॥ अन्येद्युरन्यस्मिन् दिने । प्रोष्याऽऽगतायाः प्रवासनिवृत्तायाः ॥ ७ ॥ विश्रान्तेति सूक्ष्ममात्रप्रसरणाद्विरतकान्तिकुन्दळम् । "प्रान्तावोष्ठस्य सृक्कणी" इत्यमरः । अत एवेषत्पाण्डरिताधरान्तम् ॥ ८ ॥ हन्त स्मरामीति गर्भवाक्यम् ॥ ९ ॥ सरिदिति यथा रजन्यां नदीतीरद्वय स्थितं चक्रवाकमिथुनं अन्योन्यसङ्गममनवाप्य शोकपर्याकुलं भवति तथा आवामपि अभूवेति भावः ॥ १० ॥ आप्य

विवर्जयन्ताावितरेतराङ्गस्पर्शौ स्सवं सन्निहितौ रहोऽपि ।
नक्तं सरित्तीरयुगोपविष्टचक्राह्वयद्वन्द्वदशां मतौ स्वः ॥ १० ॥

आश्लेषलोभात् पुरतः प्रसर्पन्नधर्मभीतेश्च निवर्तमानः ।
करो ममाऽऽप्येव वणिक् ससर्पां श्रीखण्डवल्लीं विधृतश्रमोऽभूत् ॥ ११

स्मृतिकारानुपालभ्य विलप्य निजदुर्दशाम् ।
आशास्य च पुनर्वीक्षामगमं वहिरुन्मनाः ॥ १२ ॥

साध्वकरोन्निजकृत्यान्यालिश्चेटी च पीठमर्दश्च ।
संकेतमाप सुमुखी तदपि परेद्युर्न सङ्गमोऽभून्नौ ॥ १३ ॥

अनर्गळं स्वैरमिति प्रवृत्ते चिन्तासमुद्रे चरमस्तरङ्गः ।
औन्नत्यमन्याधिकमेत्य पश्चादागच्छतां प्राक्प्रसरं न्यरौत्सीत् ॥ १४ ॥

लब्ध्वा आङ्पूर्वादापेर्ल्यप् ॥ ११ ॥ स्मृतिकारान् मनुप्रभृतीन् रजस्वलागमननिषेधादिति भावः ॥ १२ ॥ न सङ्गमोभूदिति । दैवयोगाभावादेवेति भावः ॥ १३ ॥ चरमस्तरङ्गः अन्येद्युरावयोर्न सङ्गमोभूदिति पूर्वश्लोकोक्तचिन्ताप्रकार इत्यर्थः । अन्यासाधारणीमुन्नतिमवाप्नुवन्तः कल्लोलाः पृष्ठत आगामिनां प्रतिबन्धकाः खलु भवन्ति । पूर्वेद्युरिवाद्यापि भग्नाशः किमु भवानीत्याशंकया चिन्तासन्ततेरुपरोधोऽभूदिति भावः ॥ १४ ॥ प्रघाणोऽलिन्दः । "प्रघाणप्रघणालिन्दा" इत्यमरः ।

स्वैरं प्रधावन् सहसा प्रघाणस्थूणाकृतास्फाल इवातिबालः।
स स्वागसैव क्वथितान्तरङ्गः स्तब्धः क्षणं दिक्षु दिदेश चक्षुः ॥१५॥

सुप्तो नु मूर्छामुत लम्भितो नु भ्रान्तो नु मग्नो विरहाम्बुधौ नु।
एवं दशां स्वां स विकल्पमानो व्यामूढचेता विललाप भूयः ॥१६॥

निद्रा मां नियतं प्रतारितवती का नाम सा प्रेयसी-
संकेतप्रतिपालिनो युवजनस्याः ज्ञातमद्याखिलम्।
सापत्न्यादिह रन्ध्रमाप्य कुटिला व्यामूमुहन्मामियं
नूनं तत् कुत एव कोमलतनोः कष्टं पिशाच्या अपि ॥ १७ ॥

स्वागसेति चिन्तामग्नेन मया दयितागमनप्रतीक्षणं विस्मृतमिति कृत्वा तदेवाऽगः कल्प्यते ॥ १५ ॥ १६ ॥ अथ पूर्वश्लोकोक्तविकल्पकोटि-चतुष्कात् प्रथमामादाय पद्यद्वयेन निद्रामुपालभते ॥ निद्रेत्यादि। कानामेति। सा निद्रा वल्लभागमप्रतीक्षणाय जाग्रतः कामिनो निमेषोऽपि न संपद्यत इति प्रथमतर्को निरस्यते। पुनस्तमेव तर्कमन्यथा स्थापयति आः ज्ञातमिति। आः इति कोपे पीडायां वा "आस्तु स्यात् कोपपीडयोः" इति नानार्थेष्वमरः। सापत्न्येति रात्रौ जायानिद्रयोर्युगपदेवानुभूयमानत्वान्निद्रायास्सापत्न्यमारोप्यते। तत्सापत्न्यं। यथा कथञ्चित् समानधर्मेणोरेव सापत्न्यप्रसक्तिरिति भूयोऽपि प्रथमतर्कमुन्मूलयति ॥ १७ ॥ प्रार्थ्यमानमिति तथानिर्द्धारितं। अनेहस्यवसरे ॥ १८ ॥ स्वशापप्रयोगसामर्थ्यप्रतिपादनाय तपस्वितोऽहमित्यन्तं। अधक्ष्यमिति दहतेः क्रियाति-

निद्रे! निन्दामि न त्वां कथमिव कुमतिर्या त्वमभ्यर्थिताऽपि
स्वप्नालोकाभिलाषादहह विरहरात्रीषु दूरं व्रजन्ती ।
दिष्ट्या संकेतभूमाविह तु दयितया प्रार्थ्यमानागमं मां
गाढं व्यामोहयन्ती पुनरपि विरतेऽनेहसि प्रद्रुताऽसि ॥ १८ ॥

देवस्य विश्वजयिनो मकरध्वजस्य संसेवनेन चिरलब्धतपास्त्रितोऽहं
शापैरधक्ष्यमधुना यदि जातु काले न त्वां रतान्तसमयेष्ववतंसयिष्यम्॥

हा धिक् क्व जीवितसमा नियतन्निवृत्ता
सा स्यात् कथं तदिह नाऽगतवान् स दूतः ।
आगत्य सुप्तमवगत्य च मां गतः किं
संभाव्यते कथमिदं ननु पीठमर्दे ॥ २० ॥

इत्युन्मिषद्भिर्विविधैर्विकल्पैः पीडालतापल्लवजालकल्पैः ।
व्यामोहितस्यास्य विभिन्नलोमा न्यवर्तताज्ञातकथः सुदामा ॥ २१ ॥

पत्तौ भविष्यति लृङ् । ढत्वे मष्भावे "षढोःकस्सी" (८-२-४१) ति कत्वे रूपम् ॥ १९ ॥ हेति उन्मत्तसाधारणीयमास्थिरता ॥२०॥ अस्येति "षष्ठी चानादर" इति (२-३-३८) भावलक्षणे षष्ठी । विभिन्नेति. अज्ञातकथत्वात् किं माधवेनोच्यत इतिभयात् पुलकितः ॥२१॥ माधवस्यौत्सुक्यं प्रकाशयितुं सेत्यावर्तते ॥ २२ ॥ एकः सुदामा अ-

किं मां वद प्राणसमा प्रशास्तिः कुत्राद्य सा? किं प्रतिपद्यते सा? ।
प्रश्नैरमीभिस्त्वरयन्तमेनमासीत्समाश्वासयितुं स नालम् ॥ २२ ॥

पृच्छावकाशाननवेततत्त्वो यथा यथैको विरळीचकार ।
तथा तथाऽन्यो मुहुरुद्धशंकः प्रश्नान् निजान् पल्लवयाञ्चकार ॥ २३ ॥

प्रियाप्रवृत्तेरनभिज्ञतां स्वां जगाद चान्ते विधुरः सुदामा ।
मुमूर्च्छ चाऽशैकबलः स कामी बत द्रुतप्रद्रुतधैर्यशेषः ॥ २४ ॥

अनर्गळोदीर्णझळज्झळोग्रमपाङ्गमार्गेण विनिर्गळन्ति ।
अश्रूणि तस्याश्रममन्वतिष्ठन् वटालवालाम्बुनिषेककृत्यम् ॥ २५ ॥

युगान्तकाले युगपज्जगन्ति संक्षिप्य कुक्षावुदरंभरियः ।
दळे वटस्य स्वयमेव शिश्ये तलेऽधुनाऽक्लिश्यत हन्त तेन ॥ २६ ॥

न्यो माधवः ॥ २३ ॥ २४ ॥ झळज्झळेति । प्रवाहानुकरणं । अ-
श्रममनायासम् ॥ २५ ॥ उदरम्भरिरिति । "फलेग्रहिरात्मंभरिश्च"
(३-२-२६) इति सूत्रे चकारस्यानुक्तसमुच्चयार्थकत्वादुदरंभरिरित्यपि इ-
ति व्याख्यातारः । "ज्येत्स्नाकरंभमुदरम्भरयश्चकोराः" इति मुरारिः ।
अक्लिश्यत इति भावे लङ् । कल्पान्तकाले पूरितोदरो दामोदरः स्वार्थैक-
पर इवागणितमहाप्रळयोपप्लवो वटपत्रमध्यं स्वयमेव सुखं यदध्यशेत त-
स्य प्रतीकारोऽयं क्लेश इति च द्योत्यते ॥ २६ ॥ अर्द्धेति पूर्वार्द्धोपा-

अत्रासंज्ञं कथनम्यथैनमाश्वास्यन्नर्द्धसमस्ययैव ।
प्रचक्रमे वक्तुमनुक्रमज्ञः संरुद्धशोकप्रथिमा सुदामा ॥ २७ ॥

अकाण्ड एव ग्लपितोऽसि हन्त किमित्यकस्मात्तव साहसिक्त्यम् ।
विलूय मूलं पयसा निषिञ्च महीरुहः पोषमुपेष्यतिद्राक् ॥ २८ ॥

अहो अनाकर्णितवाक्यशेषो विकत्थसे पामरनिर्विशेषम् ।
निधित्सते दध्नि समुध्धृताज्ये का नाम गोपी वद मन्थदण्डम् ॥ २९ ॥

वक्रोक्तिभङ्गीभिरलं प्रसीद पातुं प्रियोदन्तीमंम श्रुतिभ्याम्
वितीर्णकर्णः शृणवानि सर्वं वृत्तं प्रियाया इति नान्यबुद्ध्या ॥ ३० ॥

ससुदामप्रश्नस्य यथोत्तरार्द्धं माधवस्योत्तरं स्यात्तथेति भावः । प्रथिमा बाहुल्यं “ पृथ्वादिभ्यइमनिज्वा” (५-१-१२२) “ रऊतोहलादेर्लघोः” (६-४-१६१) ॥ २७ ॥ विलूयेति मूले च्छिन्ने सलिलसेकः किमर्थक इति लोकोक्तिः। उपेष्यति नोपेष्यतीति विपरीतलक्षणा । अनाहृतप्रियप्रवृत्तिर्भवानेव मे शोकनिदानमित्याशयः ॥ २८ ॥ अहो इति “ ओत् ” (१-१-१५) इति प्रगृह्यत्वात् प्रकृतिभावः । पामरनिर्विशेषं पामरसदृशं । श्रुते श्रोतव्ये वाक्यशेषश्रवणायासो व्यर्थ एवेति भावः । बहुधा प्रपञ्चितानामपि त्वद्वचसां प्रियावृत्तान्तो नोपलब्ध इति हि पिण्डितोऽर्थः । स च मया ज्ञात एवेति हृदयम् ॥ २९ ॥ अन्येति न प्रिय उदन्त इति बुद्ध्या अपि तु प्रियाया उदन्त एवेति पुनरपि वक्रोक्तिरालम्ब्यते ॥ ३० ॥ खल्विति “ अलंखल्वोः ,, (३-

तद्गेहमासेन मयाऽत्र तस्याः प्रवासचिह्नान्युपलक्षितानि ।
मृषानुमानैः खलु मां प्रलोभ्य यथार्थमावेदय तत्र दृष्टम् ॥ ३१ ॥

एकाकिनी गायति कापि तत्र रुद्धान्तरस्मिन्नपरं प्रकोष्ठे ।
व्यापारिता स्याद्गुरुभिर्वराकी नूनं सखीभिस्सह गानगोष्ठ्याम् ॥ ३२ ॥

स्वरेण तां तद्भगिनीमवैमि शिष्टाः पुनर्घोरणया च सुप्ताः ।
संकल्पमूढेन मयाऽप्यदृष्टा संकेतमागादपि नाम बाला ॥ ३३ ॥

एकान्तयोस्संल्लपतोरुदारस्वराण्यपि प्रस्फुटमूकिमानि ।
प्रशावतः कस्यचिदाकुलानि पार्श्वे ततः शुश्रुविरे पदानि ॥ ३४ ॥

उद्दामदावानलवेष्टितानामाकस्मिको घोष इवाम्बुदस्य ।
रवः स सूक्ष्मोऽपि तयोः श्रवस्सु व्यधात्सुधासेचनचाकचक्यम् ॥ ३५ ॥

४-१८) इति प्रतिषेधे क्त्वा ॥ ३१ ॥ अन्तरस्मिन् प्रकोष्ठे बाह्यद्वारे "अन्तरं बहिर्योग,, इति गणसूत्रेण सर्वनामता । गुरुपारतन्त्र्यमागमनप्रतिबन्धकं स्यादित्याशंका ॥ ३२ ॥ घोरणा नाम सुप्तानां निश्वासोच्छ्वासाभ्यामुत्थापितः शब्दविशेषः " घोर शब्द ,, इति तौदादिकाल्ल्युट् । अपि नाम इत्याशंसायाम् ॥ ३३ ॥ पदानि पदक्रमशब्दाः पीठमर्दानां किल प्रकृतिसिद्धोऽयं निश्शब्दसञ्चारः ॥ ३४ ॥ आकस्मिक इति " तत्र जात,,इति ठकि"अव्ययानां भमात्र,, इति टिलोपः । चाकचक्यं चकचकभावं चमत्कारविशेषम् ॥ ३५ ॥ अव-

क्षणाच्च ताभ्यामवधारितात्मा गीर्भिस्त्वरोदित्वरगद्गदाभिः ।
एह्येहि यामेत्यसकृद्ब्रुवन् स द्वित्रैः पदैरन्तिकमाससाद ॥३६ ॥

सांद्रानन्दस्साधुसंभावनाभिः श्रीदामानं मानयामास शौरिः।
संकेतस्थप्रेयसीमुक्तदूतं प्रत्युद्यातुं संरभन्ते ह्यभीकाः ॥ ३७ ॥

श्रीदामा निजपीठमर्दपदवैदग्ध्यं सुदामा पुनः
स्वस्याश्वासनकौशलं मुररिपुः स्वं धैर्यमन्यादृशम् ।
एकैकोऽपि कुतूहलादिति निजं चातुर्यमस्तौत्समे
संभूयाथ च राधिकामिति तदा कोलाहलः कोऽप्याभूत्॥३८॥

सपदि स ससुहृत् प्रतिष्ठमानो दयिततमानिलयायितं निकुञ्जम् ।
मुखमथ बिभराम्बभूव शौरिर्मुदिरविनिस्सृतचन्द्रचारुशोभम्॥३९ ॥

॥इति विटाविभावर्याम् द्वितीयोयामः॥

धारीतीति पीठमर्दकृत्याय प्रेषितः श्रीदामाऽयमिति व्यक्तिविशेषेण निर्द्धारितः । यामेति लोटो मस् ॥ ३६ ॥ ३७ ॥ अस्तौदिति स्तौतेरादादिकाल्लुङ् । समे सर्वे संभूय मिळित्वा राधिकामस्तुवन् ॥ कामुकानां तत्सहकारिणां च स्वभावोऽयम् ॥ ३८ ॥ मुदिरो मेघः "घनजीमूतमुदिरे"त्यमरः । बिभरांबभूव बभार "भीह्रीभृ,, (३-१-३९) इति आम् श्लुवद्भावश्च ॥ ३९ ॥

इति श्रीविटविभावरीव्याख्यायाम् चान्द्रिकाख्यायाम्
॥ द्वितीयो यामः ॥

॥ अथ तृतीयो यामः ॥

चोदितो नु मदनाशुगतोत्रैः कालितो नु दयितागुणजालैः ।
आस्थितो नु स मनोरथमेव प्रास्थितः पृथुजवं प्रचचाल ॥ १ ॥

कामुकः स दयितामभिसर्पन् वामलूरकमबुध्यत सालम् ।
पल्लवान् परममन्यत शूकान् गोष्पदान्यगणयद्ध्रदनानि ॥ २ ॥

सोऽकरोत् सुपथि कापथभीतिं द्वारवुद्धिमाधीभीत्ति बबन्ध ।
ध्वान्तसंकटमवाप शशांकादिन्द्रजालमतनोरतिचित्रम् ॥ ३ ॥

उन्मिषत्पुळककंचुकिताङ्गः केशवः कलितधीरभिसारे ।
कुर्वतस्तत इतो गतिविघ्नं कण्टकान् पथि तृणाय न मेने ॥ ४ ॥

नातिदीर्घमपि दुर्घटचारं नीतवानयनमापदुदारम् ।
सोऽगमत्सपदि वीरुदगारं स्वागतोन्मुखसखीप्रतिहारम् ॥ ५ ॥

मदनाशुगैरेव तोत्रैः तोदनदण्डैः "तोत्रं तु व्रजने वेणवेऽपि च" इति विश्वः। दयितागुणैरेव गुणैः कालितः आकृष्य सन्निधिं नीत इत्यर्थः । यथा ". कार्यकालं संज्ञापरिभान''मित्यत्र । मनोरथमेव रथमास्थितः आरूढः । पृथुजवमतिशीघ्रं ॥ १ ॥ वामलूरकं वल्मीकं। स्वार्थे कः "वामलूरश्च नाकुश्च वल्मीकं". इत्यमरः । दयितागृहान् गच्छतोऽस्य पथि प्राकारा नाकुमात्राः कण्टकाः पल्लवकल्पाः दुर्गाणि गोष्पदप्रमाणा-

द्वारदेशविनिवेशितदूतो दूरदुःश्रवपदक्रमशब्दः ।
व्याकुलालिविनिवेदितमार्गो वेश्म तत्स विशति स्म विलासः ॥६ ॥

मारुतावधुतपर्णकदंबान्मन्दमुच्चरति मर्मरशब्दे ।
सत्वरावहितसादरकर्णं स्वागमाय सहसा स्पृहयन्तीम्　　॥ ७ ॥

सान्द्रतापविवशामपि कार्श्ये सुन्दरस्वरुचितुन्दिलिताङ्गीम् ।
मन्दकन्दलितरागमनोज्ञमैन्दवीमभिनवामिव लेखाम्　　॥ ८ ॥

क्षामभासमुपवासविरामे पारणक्षणविलम्बविहस्ताम्
वाष्पवारिविहिताप्लवकृत्यां दृष्टिमिष्टदिशमाशुनयन्तीम्　　॥ ९ ॥

नि च बभूवुरित्यर्थः॥ "गोष्पदं सेवितासेवितप्रमाणेषु" (६-१-१४५) इति निपातनात् साधुः ॥ २ ॥ सुपथीति " न पूजनात् " (५-४-६९) इति समासान्तनिषेधः ॥ ३ ॥ अभिसारे अभिसरणे युद्धयात्रायामिति च । कण्टकान् शूकान् क्षुद्रशत्रूंश्च "सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः !" इत्यमरः । तृणायेति " मन्यकर्मण्यनादर " इत्यनेन चतुर्थी ॥ ४ ॥ नोतवानतिवाहयन् । अयनं मार्गं । आपद्द्वारं अनर्थबहुलं वीरुदगारं लतागृहं । स्वागतोन्मुखी प्रत्युद्यानसन्नद्धा सख्येव प्रतिहारो यस्य तत् । स्वागतेति श्लोकवृत्तमपि सूचितं ॥ ५ ॥ ॥ ६ ॥ अथ पञ्चभिः कुळकेन नायिकां वर्णयति । वातधूतपत्रस्वनितं स्वकान्तपादन्यासशब्दाशंसां कुर्वतीं प्रेयसीं प्रियतमो ददर्शेत्यन्वयः॥७ नूतनशशिकलापि समन्ततः प्रसारिभिमयूखैनातिब्रीडगात्री रक्तिमलेशतरञ्जिता च लक्ष्यते ॥ ८ ॥ कान्तागमनप्रतीक्षणमेवोपवासः । पार-

अन्तरान्तरनुचिन्त्य दुरन्तानन्तरायनिवहान् विलपन्तीम् ।
देवता अथ मनोरथसिद्धिं सेविता असकृदर्थयमानाम् ॥ १० ॥

पार्श्वगप्रियसखीकरलीनां पाणिपद्मधृतपाण्डुकपोलाम् ।
प्रेमभ्रमपरिमार्जितचक्षुः प्रेयसीं प्रियतमोऽथ ददर्श ॥ ११ ॥

आशिरस्पदपरस्परगात्राण्यातुरे प्रथममेव हि दृष्टी ।
ऊढमोदमुपगूह्य तयोर्द्रागूहतुः कमपि सम्मदमुच्चैः ॥ १२ ॥

अङ्कैरथ तयोरुभयोरप्युन्मिषत्पुलकपालिनिचोलैः ।
आशुभाविकुसुमायुधयुद्धे बद्धवर्मभिरिवाविरभावि ॥ १३ ॥

स्तम्भसम्भ्रमविहस्तमभीक्ष्णं श्लक्ष्णमात्मदयिताकरपद्मम्
धार्यमाणमथ साध्वापि सद्यः स्विद्य नोऽच्युतकरात् च्युतिमाप॥१४॥

णोति इतः परं विलम्ब मसहमानां । दृष्टिविशेषणानीमानि ॥ ९ ॥ अन्तरा मध्ये ॥ १० ॥ ११ ॥ आशिर इति । शिरस आरस्य पदपर्यन्तानि सर्वाण्यप्यङ्गानीत्यर्थः । ऊहतुरिति वहेर्लिट् । ॥ १२ ॥ निचोलः कंचुकं "निचोलः प्रच्छदपटः" इत्यमरः । बद्धवर्मभिः आमुक्तकंकटैः सन्नद्धैः । आविरभावि भावे लुङ् । ॥ १३ ॥ दयिताकरपद्ममच्युतकरात् च्युतिमापास्खलदित्यन्वयः । अनेन सात्विकविकारेषु नायिकायास्तम्भो नायकस्य स्वेदश्च वर्णितः ॥ १४ ॥ सार्थकानि समानप्रयोजनानि तुल्यार्थानीति च । पदानि लक्ष्माणि शब्दांश्च।

सार्थकानि सुबहून्यथ पश्यन् हर्षसंभ्रमभयादिपदानि ।
एकतस्समुदितानि तयोर्ह्येकशेषमकरोत् स्मरसूरिः ॥ १५ ॥

सत्वरोपसृतसख्युपदिष्टं पुष्पतल्पमथ सेवितुकामः ।
माधवः स्वसविधं विधुरान्तामंकपाळिवलयेन निनाय ॥ १६ ॥

पश्यतः परिजनस्य समक्षं व्रीडिताऽपि सपदि प्रियपाणिम् ।
स्पर्शसम्मदजडैर्निजगात्रैः साऽशकत् कृशतनुर्न निरोद्धुम्॥ १७ ॥

कंचुळीमनु निकुञ्चितमेकं काञ्चिलग्नकटकाञ्चलमन्यम् ।
कान्तपाणिकमलान्तमुदीक्ष्य क्रान्तमाळिभिरथान्तिकभूमेः॥ १८ ॥

गूढगूढमपसारितपादं मन्दमन्दमसार्पतुकामाम् ।
सा विकृष्य वसनेन वयस्यां पार्श्व एव विनिवेशयति स्म॥ १९ ॥

हर्षसंभ्रमादिविकाराणां युगपदुदयेऽपि स्मरप्रभावात् तत्रैको हर्ष एवेतरानतिचक्रामेत्यर्थः । एकस्यामेव विभक्तौ दृष्टानां समानार्थकानां हर्षादिपदानां स्मरनामकवैयाकरणेन एकशेषः कृत इति श्लेषसंसृष्टा समासोक्तिः ॥ १५ ॥ सेवितुकामेत्यत्र "तुं काममनसोरपि" इतिमलोपः । अंकपाळिवलयेन क्रोडमण्डलेन आलिङ्गयेति यावत् । "आलिङ्गनमपि क्रोडीकरणं चांकपाळ्यपि" इति यादवः ॥ १६ ॥ समक्षं प्रत्यक्षं अव्ययीभावः । अशकदिति शक्नोतेर्लुङ्यङ् ॥ १७ ॥ कंचुळी स्तनावरणवस्त्रं । काञ्चिर्मेखला । क्रान्तमपाक्रान्तामिति भावे क्तः

वारिताऽपि चतुराऽथ सुशीला गन्तुमेव मुहुरुत्सहते स्म ।
स्वैरचारिनिजयूथवियुक्ता वागुराहतपदा हरिणीव ॥ २० ॥

मन्मथासहनमानसवृत्तौ माधवे निरपराधमथ स्वम् ।
सन्दिदर्शयिषुराप्तवयस्या प्रस्तुतानुगुणमेवमवादीत् ॥ २१ ॥

मुञ्च मुञ्च सिचयाञ्चलमेतद्धिक्तव प्रतिकृतिव्यसनित्वम् ।
सादरं स्पृशति सागसि जाग्रत्यग्रतोऽपि यदनागसमेव ॥ २२ ॥

यस्य चित्रमनुचुम्ब्य सरागं "योजयैनमयि चेतनये"ति ।
वक्ष्यसि स्मरसि तं घटयन्त्याः पारितोषिकमयं मम रोधः? ॥ २३ ॥

॥ १८ ॥ अपसारितपादमित्यपसर्पणाक्रियाविशेषणम् ॥ १९ ॥ सुशीलेति सख्यास्संज्ञा । वागुराहतपदा कूटयन्त्राकृष्टचरणा । "वागुरा मृगबन्धिनी,,त्यमरः । हरिणी मृगी ॥ २० ॥ माधवे विषये स्वमात्मनं निरपराधं सन्दिदर्शयिषुः प्रतिपादयितुकामा ॥ २१ ॥ यत् प्रतिकृतिव्यसनित्वं प्रतीकारसंरम्भः । सागसि चेलाकर्षणादपराद्धे माधवे अग्रतो जाग्रत्यपि अनागसं मामेव स्पृशति तदेतत्तव प्रतिकृतिव्यसनित्वं धिक् " धिगुपर्यादिषु ....,,इति द्वितीया । नायिकाकृतं स्ववस्त्राकर्षणं अन्यथा प्रतिपादयति सखी । "सिचयो वस्त्रं वसनमंशुकं,, इति यादवः ॥ २२ ॥ एनं चित्राविलिखितं नायकं चेतनया योजय जीवयेति वक्ष्यसि यद्वोचस्तत् स्मरसि "अभिज्ञावचने लृट्,, (३-२-११२) इति भूते लृट् । पारितोषकं प्रीतिफलम् ॥ २३ ॥ मुग्धे मूढे वरं मनाक् प्रियम् । इतरजनसान्निधायेव त्रपायोगादिति भावः

वल्लभेन शिथिलीकृतनीविर्व्रीडिता भवसि चेन्ननु मुग्धे! ।
मादृशां किमु न पश्यसि साक्षात्कारतो वरमसन्निधिमेव ॥ २४ ॥

चन्द्रिकाभिसरणे तव न ह्रीः सा भृशं पुनरुपांशु विहारे ।
किं वृथा प्रलपितैरयि मुग्धे! वामदृक् भवसि सत्यमिदानीम् ॥२५॥

यद्वियोगविधुरा मुहुरस्मान् रोदयस्यनुदिनं स्ववयस्याः ।
अद्य तस्य सविधे सभियस्ते वाचमन्यथयते बत चेष्टा ॥ २६ ॥

चण्डि! केळिकुतुकेन निजाळीः कातरा विधुरयिष्यसि मन्ये ।
ज्ञातमद्य वयमीदृशकेळीर्नो जडा अपि सहेमहि भूयः ॥ २७ ॥

॥ २४ ॥ सा ह्रीः उपांशु रहसि " रहश्चोपांशु चालिङ्ग ,, इत्यमरः । वामदृक् विपरीतदृष्टिः वस्तुतस्तु सुदृक् ॥ २५ ॥ अन्यथयते अन्यथा करोति अनृतां कुरुत इत्यर्थः तत्करोतीति णिचि इष्ठवच्चेत्यतिदेशेन भसंज्ञायां अव्ययत्वाट्टिलोपे च रूपसिद्धिः ॥ २६ ॥ अथ " वाचमन्यथयत,, इति पूर्वश्लोकोक्तमर्थं सोपहासमाह । चण्डीति । हे चण्डि! शठे अनेन परिहासेषु क्रौर्यं त्वयि संभाव्यमेवेति समर्थ्यते कातरा भीरुः । अतस्सखीनामार्जवं व्यज्यते । निजाळीः स्ववयस्या अस्मान् विधुरयिष्यसि व्याकुलाः करिष्यामीति केळिकुतुकेन हेतुना मन्यसे किमित्युपहासः " प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ,, (१-४-१०६) इति मद्ध्यमोत्तमयोर्व्यत्ययः । नायकाविरहे यद्यच्चापलं त्वमाविष्करोषि तत्तत् परिहासमात्रफलकं । न तु यथार्थमित्याशयः । ज्ञातमद्य अधुना सङ्गमे तव चेष्टां साक्षात्कुर्वत्या मया वास्तवं तव हृद्गत-

भ्रूयुगं ननु भनक्षि किमर्थं? तर्जनीं नटयसेऽद्य वृथैव ।
भीषिकाभ्य इह ते न बिभेमि प्रस्थिताऽस्मि कुपिताऽसि हि मह्यम् ।

इत्युदीरितवतीमथ शौरिः "द्वारि तिष्ठति सखाऽद्य ममैकः ।
अस्मदर्हति स नैवमवज्ञामर्हयैन,,मिति तां स्म नियुंक्ते ॥ २९ ॥

शंसतैव धृतगौरमेवं स्रांसित सपदि नीविनिवेशे ।
तद्रुरुत्सुतरुणीकरपाशभ्रश्यमानवसनां निरगात्सा ॥ ३० ॥

वीरपाणमधरामृतपानैः कुर्वतोः पुळककंचुकभाजोः ।
कामिनोः कटकताडिततूर्यं मान्मथं प्रववृतेऽथ समीकम् ॥ ३१ ॥

उन्नतस्तनमहीधरचारी प्रस्खलन् प्रणयिपाणिरधोऽधः ।
विश्लथांगमवलंङ्घ्य नितम्बे निष्पतन् स्तिमितता प्रतिपदे॥ ३२ ॥

मवगतमित्यर्थः । स्पष्टं अन्यत् । सहेमहीति सहतेर्लिङ् । ईदृशपरिहासा-नां अवसरं न दास्याम इत्यर्थः । केळिरित्यत्र " द्रवकेळिपरीहासा,, इत्य-मरेणाम्नातेऽपि महाकविप्रयोगानुसारात् स्त्रीलिङ्गम् ॥ २७ ॥ भनक्षीति रौधादिकस्य भञ्जेस्सिप् । नटयस इति घटादित्वान्मित्वं । म-ह्यमिति " क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः " इति चतुर्थी ॥२८॥ अर्हय पूजय सम्भावय २९ ॥ धृतगौरवं परिहासशंकानिवारणायेदम्॥ ॥ ३० ॥वीरपाणं युद्धारम्भे निर्वर्तितं पानं "वीरपाणं तु यत् पानं वृ-त्ते भाविनि वा रणे " इत्यमरः ॥ ३१ ॥ अधोऽधइति सामीप्ये द्वि-

नूतनोदितविधोर्विजयं स्वं स्विद्यते वरतनोर्वदनाय ।
वर्णयन्नपजहार स वीटीं पूर्णपात्रमथ तस्य सकाशात् ॥ ३३ ॥

चित्तजन्मसदनं प्रविशन्तं चित्ततस्करकरं समुदीक्ष्य ।
मद्ध्यमाशु वलिनं प्रतिहारी क्रन्दति स्म रशनामापीरुच्चैः ॥ ३४ ॥

कामुके किमपि चापलमूरुस्तम्भमूलसविधे विदधाने ।
सा श्रुतिप्रणयिनी प्रणयिन्या दृष्टिराशु निमिमील विलक्षा ॥ ३५ ॥

प्राणनाथरदनच्छदसारे पीतमात्र इह पेशलगात्र्याः ।
सीत्कृतानुमितसत्वरशान्तिर्निर्ववौ विरहघोरकृशानुः ॥ ३६ ॥

भावः । स्तिमिततां स्तब्धतां ॥ पर्वतशिखरात् भ्रष्टाः किलाधोऽधस्खलित्वा सानौ पतन्तः क्षणं स्तब्धा भवन्ति ॥ ३२ ॥ स्वं वदनसम्बन्धि स्विद्यते स्वेदबिन्दुकिताय उदयकालसंसक्तसमुद्रसलिलबिन्दुसुन्दरेन्दुबिंबसाम्यसम्पादनार्थमिदम् । यथा कश्चित् सेवको राज्ञे नवाभ्युदितशत्रुजयमुपहृत्य उत्तरीयादिपारितोषिकं हठादाकर्षति तथेति भावः "हर्षादुत्सवकालेयदलंकारांबरादिकं । आकृष्य गृह्णत पूर्णपात्रं पूर्णानकं च तत्" इति हारावली ॥ ३३ ॥ चित्ततस्करो दयितः "तद्वहतो...."इति सुट् ॥ वलिनं वलिसहितं "वलिनो वलिभस्समौ" इत्यमरः । बलशालिनमिति च । हारी मनोहरः प्रतिहरी द्वारपालिकेति च। "रत्नं मणिर्द्वयो" रित्यमरः । दुर्बला ह्यापत्सु वलवन्तं मद्ध्यस्थमाक्रन्दन्ति ॥ ३४ ॥ श्रुतिप्रणयिनी कर्णान्तस्पर्शिनी वेदरसिका च ॥ ३५ ॥

स्वस्य मन्मनमनोरुपदेशं कुर्वते प्रियमुखाय मृगाक्ष्याः ।
दक्षिणामकुरुत श्रुतियुग्मं कुण्डलेन विपरीतरतेषु ॥ ३७ ॥

मन्मथोपनिषदामथ सारं मानयन्मणितमन्त्रमुदारम् ।
केवलप्रमदभूमनि कल्ये केशवः क्वचिदसीम्नि निलिल्ये ॥ ३८ ॥

भ्रष्टो बम्भ्रमदभ्रगर्भविवरेभ्योऽदभ्रभो भव्रजः
प्राप्ताकाण्डतमस्समागममखण्डाचण्डगोर्मण्डलम् ।
आ मूलाच्चलिता शिलोच्चयतटी झांकारिणश्चानिलाः
क्षोभारम्भमुदित्वरं स्मरपुरस्याऽसूत्रयाश्चक्रिरे ॥ ३९ ॥

॥ ३६ ॥ मन्मनमनोः मन्मनमन्त्रस्य दम्पतिभ्यामन्योन्यकर्णे जप्तं रहस्यं मन्मनशब्देनोच्यते । यथाऽऽह हारावलीकृत् " सुरते कर्णदेशेषु यच्च देशीयभाषया । दम्पत्योर्जल्पितं मन्दं मन्मनं तद्विदुर्बुधाः " इति । मन्त्रोपदेष्टारः किल दक्षिणामर्हन्ति ॥ ३७ ॥ मणितं रतिकूजितं कल्ये निर्मले परिशुद्धे उपनिषद्भिर्देवताराधनं कुर्वतो ब्रह्मानन्दे लयो युक्त एवेति भावः ॥ ३८ ॥ भ्रष्ट इति । बम्भ्रमतां कुटिलं चलतां "नित्यं कौटिल्ये गतौ ,, (३-१-२३) इति कौटिल्यार्थकस्य यङो लुक् । अभ्राणां मेघानां गर्भविवरेभ्य उदरसुषिरेभ्यः भ्रष्टोऽदभ्रभो बहुलशोभो भव्रजस्तारकानिकरः तत्सादृश्यान्निर्गीर्णा केशपाशाद्गलिता कुसुमावलिः । प्राप्ताकाण्डतमस्समागमं असमय एव राहुग्रस्तं । अखण्डाचण्डगोः पूर्णचन्द्रस्य मण्डलम् । तत्समानं मुखम् । आमूलान्मूलत आरभ्य चलिता कम्पिता शिलोच्चयतटी पर्वतसानुः तत्सदृशी कुचतटी । झांकारि-

चतुरोच्चालितोच्चकुचोच्छ्रयतश्च्युतस्ताडिति स्फुटहारमणीन् ।
पततः परितः किरती सुदती विविधं विदधे विपरीतरतम् ॥ ४० ॥

द्रुतविळम्बितदुर्मदडम्बरस्समजनि क्रमशोऽङ्गजसङ्गरः ।
सुमशरोऽप्यवरोप्य निजं धनुश्चिरपरिश्रमविश्रममन्वभूत् ॥ ४१ ॥

आरामसीमानि निळीय वसन् प्रसुप्तमालोक्य युगमनत्ररासवसे रतान्ते
रन्ध्रप्रतीक्षणचणश्शनकैरुपेत्य घर्माम्बुहारमहरत् पवमानचोरः ॥ ४२ ॥

अमन्दकन्दळत्प्रमोदसागरोदरस्फुर-
त्तरङ्गभङ्गिसङ्गमानुषङ्गमङ्गळाङ्कितौ ।
परस्परानुरागसम्पदं सुखेन दम्पती
वितेनतुश्चिराय चारु चारितार्थ्यचुम्बिनीम् ॥ ४३ ॥

णोऽनिलाः वातूलास्तादृशा निश्वासाश्च । स्मरपुरस्य मन्मथनगरस्य जघनस्य उदित्वरमुदयिनं क्षोभारम्भं चलनसमारम्भं जनक्षोभरूपमुपप्लवं च आसूत्रयाञ्चक्रिरे सूचयामासुः । केशवान्तकुसुमादिभिर्जघनक्षोभोऽनुमेयोभूदीति भावः । पुरुषायितवर्णनमेतत् ॥ ३९ ॥ तडितीत्यनुकरणम् ॥ ४० ॥ द्रुतविळम्बितः क्षणान्मन्दीभूतो दुर्मदडंबरो दुरहंकारोच्छ्रायो यस्य तादृशं द्रुतविलंबितेति वृत्तसंज्ञाऽपि सूचिता ॥ ४१ ॥ आरामपवनस्तयोस्सुरतग्लानिमपनुनोदेति भावः ॥ ४२ ॥ चारु यथाभिलषितं पञ्चचामरं वृत्तं ॥ "लघुर्गुरुर्निरन्तरो भवेत्तु पञ्चचामरं"

निधुवनरभसान्ते गाढसंसक्तगात्रं तुहिनवहनपानैस्सेव्यमानं समीरैः।
मिथुनमथ तदन्तः केवलानन्दवीचीकवलितकरणाळीं कामपि प्राप मूर्च्छाम्

॥ इति विटविभावर्याम् तृतीयो यामः ॥

इति लक्षणात् ॥ ४३ ॥ निधुवनरभसः सुरतवेगः " रभसो हर्षवेयोरिति,, विश्वः । तस्यान्ते भावलाभानन्तरमिति यावत् । करणाळी इन्द्रियदशकम् । कामपि मूर्च्छां निद्राम् ॥ ४४ ॥

इति श्रीविटाविभावरीव्याख्यायाम्

चन्द्रिकाख्यायाम् तृतीयो यामः

अथ तुरीयो यामः

अचिरोदितभव्यकाव्यकान्तिस्पृहणीयाऽपि विभावरी तदानीम् ।
अभवत्त्वरमाणशेषयामा धुतदोषाकररुक् प्रभातकल्पा ॥ १ ॥

अथ प्रभातवर्णनमारभते । काव्यः शुक्रः काव्यं कविकर्मेति च । विभावरी रात्रिः । विटविभावरीसंज्ञोऽयं ग्रन्थश्च । शेषयामश्चरमयाम उभयत्र । दोषाकररुक् चन्द्ररश्मिः । दोषसमूहरूपो रोगश्च । प्रभातकल्पा विभातप्राया । ईषढसमाप्तशोभा च ॥ १ ॥ स्वकान्ता इति " औ-

अवलोक्य सुधाकरोऽपि सर्वानथ राधामधुवैरिणोर्विलासान् ।
परिरब्धुमिवौषधीः स्वकान्तास्त्वरमाणश्चरमाचलं जगाहे ॥ २ ॥

मृदुलोलितमौल्यस्तदानीं प्रतिवेश्म श्रुतियोगलोभनीयम् ।
असकृत्त्रिविधं स्वरप्रपञ्चं जुघुषुः श्रोत्रियगातृताम्रचूडाः ॥ ३ ॥

हृदि मारशराग्रकृष्टपूर्वे स्रवदस्राम्बुनि खण्डिताजनस्य ।
अकिरत् परितः परागभङ्ग्या पृषदश्वः पृथुशोकबीजजालम् ॥ ४ ॥

अविशत् करशोभिमण्डलाग्रः सरमाक्रान्तपदानुसारिमार्गः ।
मृगयार्थमिवापराद्रिसीमां मृगयूनाद्रियमाण एष राजा ॥ ५ ॥

षधीशो निशापतिः" इत्यमरः ॥ २ ॥ मौलिः शिरश्चूडा च । श्रोत्रियपक्षे श्रुतिर्वेदः । गातृपक्षे "प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः । सा श्रुतिस्सम्परिज्ञेया स्वरावयवलक्षणा" इत्युक्तलक्षणस्सङ्गीतशास्त्रप्रसिद्धश्शब्दविशेषः । कुक्कुटपक्षे श्रुतिः श्रवणम् । त्रिविधमिति एकत्र उदात्तानुदात्तस्वरितस्थानभेदैः । अन्यत्र विलम्बितमध्यद्रुतकालभेदैः । ह्रस्वदीर्घप्लुतमात्राभेदैः । उक्तं च "ऊकाल...." (१-२-२७) इति सूत्रे श्रीनारायणभट्टेन "क्रमादेकाद्वित्रिमात्रा उवर्णाः कुक्कुटस्वने । प्रसिद्धाः" इति ॥ ३ ॥ अस्रमश्रु "अस्रमश्राणि शोणित" इति विश्वप्रकाशे "ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता" इति भरतः । पृषदश्वो वायुः । कृष्टे क्षेत्रे वृष्ट्यनन्तरं बीजवापो युक्त एवेति भावः ।

निजगोप्रसरप्रसादिताशे बत सर्वज्ञशिखामणौ गतेऽस्तम् ।
तिमिरार्णव ऊर्णुनाव विश्वं न बुधो नाऽपि कविश्चिरं चकाशे ॥६॥

चिरनर्त्तनधूसरांशुकान्ते लघु निष्क्रामति शीतगौ धरङ्गः ।
तमसा पिदधे तिरस्करिण्या नवरागस्य रवेः प्रवेशनाय ॥ ७ ॥

परागभङ्ग्या परागव्याजेन ॥ ४ ॥ करेति । रश्मिशोभिविम्बाग्रः पाणौ कृपाणं कलयन्निति च । रमेति रमाकान्तस्य विष्णोः पदमाकाशं तदनुसारी मार्गो यस्य सः । सरमाकान्तानां विश्वकद्रूणां पदानुसारी अङ्घ्रिविन्यासानुसारी मार्गो यस्य स इति च । "सरमा शुनी,, इत्यमरः। मृगयूना अंकमृगेणाद्रियमाणः सम्भाव्यमानः । मृगयून् लुब्धकानाद्रियमाणः सम्भावयन्निति च " व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ,, इत्यमरः । तौदादिकस्य ङित आद्रियतेः कर्तृकर्मणोस्समानं रूपं। स एव राजा सर्वरात्रं प्रकाशमानः स चन्द्रः प्रसिद्धः कोऽपि नृपश्च। राजानो हि प्रभाते आखेटाय पर्वतविपिनं व्याधसारमेयादिभिरनुसृताः प्रविशन्ति ॥ ५ ॥ गौ रश्मिर्वाणी च । सर्वज्ञशिखामणौ शिवाशिरोभूषणे चन्द्रे कस्मिन्नपि महापण्डिते च। ऊर्णनाव तिरोदधे " ऊर्णोतेराम्ने,,ति वार्त्तिकेणाम्प्रतिषेधः । बुधकवी ग्रहविशेषौ विद्वत्कवयितारौ च। यथा कस्यचन महापण्डितस्यानन्तरं अभिनन्दकाभावात् विद्वांसो न शोभन्ते तथा चन्द्रास्तमयात् शुक्रादिग्रहा न रेजिरे ॥ ६ ॥ चिरेति। चिरनर्तनेन धूसरो मलीमसोऽशुकान्तश्चलाग्रं यस्य तस्मिन् । तादृशैरंशुभिः रश्मिभिः कान्ते रम्ये च । शीतगौ चन्द्रे कस्मिंश्चिन्नटे च । लघु द्रुतं निष्क्रामति निर्गच्छति सति। नवरागस्य उदयरागालिप्तस्य नूतनवर्णकस्य च रवेः भानोः पात्रान्तरस्य च प्रवेशनाय यौगगनमेव र-

मिहिरस्य करग्रहे कपोतद्विजलोके विहितोंकृतौ समन्तात् ।
द्युवधूर्व्यधितोडुलाजहोमं नवसन्ध्यार्चिषि सान्धकारधूमे ॥ ८ ॥

रमणं क्षणमागतं प्रवासात् कथयन्नर्यमणं सरोरुहिण्यै ।
सरसीरनु सौखरात्रिकोऽगान्मधुपौघो मधुपारितोषिकार्थी ॥ ९ ॥

उदरोल्लसदर्यमाणि निर्यद्रुतमाणिक्यमनोज्ञविभ्रमाणि ।
उदयाचलगह्वराण्यभूवन्नथ बाणासुरसालसुन्दराणि ॥ १० ॥

परितो दरघोषिभिः पतद्भिर्महितो भास्करमस्करी सदण्डः ।
इत एष्यति रञ्जितम्बरान्तो ननु का का त्वमिहेत्यकूजि काकैः ॥ ११ ॥

... नाट्यशाला तमसैव तिरस्करिण्या जवनिकया पिदधे तिरोदधे कर्मणि लिट् ॥ ७ ॥ मिहिरस्य रवेः करग्रहे रश्मिसम्पर्के पाणिग्रहणे च । पूर्वत्र सम्बन्धे षष्ठी । उत्तरत्र तु कर्त्तरीति विवेकः । कपोतद्विजाः पारावतपक्षिण एव द्विजा विप्राः । रविकिरणसम्पर्कादिवि तारका अदर्शनतामापुः ॥ ८ ॥ अर्यमणमिति । "इन्हन्पूषार्यम्णां शौ" (६-४-१२) इति नियमान्न दीर्घः । सरसीरन्विति " लक्षणेत्थंभूताख्यान ...." (१-४-९०) इति कर्मप्रवचनीयत्वाद्द्वितीया । सुखरात्रिं पृच्छतीति सौखरात्रिकः " पृच्छतौ सुस्नातादिभ्य" इति ठक् । कुशलानुयोगीति यावत् ॥ ९ ॥ उदरेति । अन्तर्ज्वलदर्कविम्बानि अत एवारुणमणिप्रकाशानि पूर्वपर्वत गह्वराणि शोणितपुरप्राकारवत् बभुः । शोणितपुरस्य चाग्निवेष्टितत्वं पुराणेषु प्रसिद्धम् ॥ १० ॥ अदरघोषि-

अलिगानलयैर्विभातवेला नलिनामोदिसमीरवीजनैश्च ।
मधुसूदनराधयोस्तदानीं सुखनिद्रारसमेधयाञ्चकार ॥ १२ ॥

इतरेषु सरोरुहेषु निद्रामपहाय स्फुटितेष्वपि प्रभाते ।
इतरेतरवक्त्रचन्द्रयोगान्नयनाब्जे न तयोरबोधिपाताम् ॥ १३ ॥

अधिकेळिगृहं निशाम्य कान्तं हरिमाभीरवधूरतान्ततान्तम् ।
उपसर्पतु सन्निधिं तदीयं भृशधीराऽपि कथन्तरामुषःश्रीः ॥ १४ ॥

भिर्निर्भयं कूजद्भिः पतद्भिः पक्षिभिः । पतद्भिरागच्छद्भिश्शंखं धमद्भिः पुरुषैश्च महितः" दरोऽस्त्री शंखभययो"रिति रत्नमाला । भिक्षुणामागमनसूचनाय तत्पुरोगामिनः शिष्याः शंखं धमन्ति इति काश्चिद्देशाचारः । सदण्डो वेणुदण्डपाणिः । प्रकृते तु " माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः " भास्करमस्करी भानुरेव भिक्षुः । रञ्जिताम्बरान्तः पाटालितगगनभागः काषायवसनश्च सन्नित एष्यति । ननु का का त्वामिह सर्वाः स्त्रियो दूरादपसरन्तु इति काकैरकूजि कूजितमिति भावे लुङ् । काकेत्याकारकः करठध्वनिरेवमुत्प्रेक्ष्यते ॥ ११ ॥ १२ ॥ १३ ॥ कान्तं सुन्दरं पतिं च निशाम्य दृष्ट्वा । आभीरवधूर्गोपी "गोधुगाभीरवल्लवा" इत्यमरः । कथन्तरामिति तरबन्तात् "किमेत्तिङव्यय....(५-४-११) इत्यामुः । उषःश्रीः प्रभातलक्ष्मीरेव लक्ष्मीः उषः श्रीरिति पदद्वयं वा । खण्डितेव प्रभातलक्ष्मीर्माधवस्य विमुखीबभूवेत्यर्थः । रतान्तसुप्तः प्रभातागमनं नाबुध्यतेति तात्पर्यं ॥ १४ ॥ विलंबे विलंबितवती । तिमिरादिधर्मोपलंभात् सर्वतोऽपसृताया अपि रजनेः धर्मिण्या निकुञ्जमात्रे विलंब उत्प्रेक्ष्यते ॥ १५ ॥ करालरश्मिः सूर्यः कश्चन

तिमिरं चिकुरश्रिया श्रयन्ती नयनैः कुड्मलितैश्च पद्मकोशान् ।
रजनिः परिकीर्णहारतारा विललंबे किमु राधिकानिकुञ्जे ॥ १५ ॥

पुर उत्पततः कराळरश्मेः करसाहस्रविलासिमण्डलाग्रात् ।
चकितां नयनेषु वेपमानामनयोः पञ्चशरो ररक्ष निद्राम् ॥ १६ ॥

अथ बोधयितुं चिरप्रसुप्तं मिथुनं तत्र सखीजनः प्रवृत्तः ।
कृपणस्य कृषीवलस्य दैन्यं कृषिबीजक्रयणोद्यतस्य भेजे ॥ १७ ॥

समनह्यदपासनाय यस्याः स हि नादित्यकरोत्करोऽप्यहो ताम् ।
कथमेष भनक्तु योगनिद्रां दनुजारेर्निजभोगतल्पभाजः ॥ १८ ॥

अयि! बोधय राधिकां सुशीले! ननु तत्रांशुमती नियोजिता हि ।
बत का भवतीह मन्नियोगेष्विति सख्यः कलहं मिथो वितेनुः॥ १९

क्रूरपुरुष इति च द्योत्यते। पञ्चशरः कृपाणपाणिं सहस्रकरमजयदित्याश्चर्यं ।कामवैभवादुदिते सूर्येऽपि तौ नाबुध्येतामिति तात्पर्यं ॥ १६ ॥ कृपणो बद्धमुष्टिः । कृषीवलः कृषकः । यथा कृपणः कृषकः भाविसमृद्धिं ज्ञात्वाऽपि प्रथमंप्रसक्तं बीजक्रयणार्थकमर्थव्ययं न सहते तथा प्रबोधनमेव हितमिति विदन्नपि प्रथमाप्रियभयात् सखीजनो राधामाधवौ बोधयितुं न पारयामासेति भावः ॥ १७ ॥ आदित्यकरोत्करः सूर्यकिरणप्रकरः । सुरपाणिसमूहश्च । स प्रसिद्धः । यां योगनिद्रां । एष सखीजनः । दनुजारेर्दैत्यारेर्विष्णोः भोगतल्पं सुरतशय्या । शेषशरीर-

प्रथमोपनताप्रियं सहन्ते हितलोभादिह दूरदर्शिलोकाः ।
विरळा हितवाग्व्यळीकहीनेत्यपरा: शिक्षयति स्म तत्र काचित् ।२०।

उपजीविषु कोऽपि भक्तमानी प्रभवे यच्छति कापथेषु साह्यम् ।
गुरवस्त्वविशेषमेव दोषं गणयन्तीति परा भृशं शुशोच ॥ २१ ॥

किमुदास्स इहाद्य पीठमर्देत्यथ पप्रच्छ परा हरेस्सखायम् ।
स च शंभळि! किं भजस्युपेक्षामिति पृच्छान्तरमुत्तरीचकार ॥ २२॥

इति तासु विमोहितास्वदूरादुदगाद्गोपकुमारवंशघोषः ।
त्रुटितेव हठाद्विघट्यमानं झटिति द्वन्द्वमबोधि चास्तनिद्रम् ॥ २३ ॥

प्रियदोर्वलयादथाच्छिनत्तां कृशगात्रीं स शठो हठादनेहा ।
अतिमुक्तलतामशोकयष्टेश्चिरसंवेष्टननिर्वृतां करीव ॥ २४ ॥

रूपा शय्या च । योगनिद्रा संभोगान्तनिद्रा । प्रसिद्धा विष्णोर्योगनिद्रा च ॥ १८ ॥ अंशुमती नाम सख्यन्तरं । मिथोऽन्योन्यम् ।१९ स्वेन प्रयुक्तमुपदेशं स्वयमेवानुष्ठातुमक्षमा परा: शिक्षयतीत्युपहासः ।२०। भक्तमानी भक्तंमन्यः। साह्यं साहाय्यम् । गुरवः तस्य प्रभोरेव पितृप्रभृतयः । अविशेषं सर्वेषूपजीविषु समानम् । नायिकागुरुभ्यो भीताया अत एवाभिसारममृष्यन्त्याः कस्याश्चिद्वचनमिदम् ॥ २१ ॥ किमुदास्स इति किमुदासीनो भवसि । आदादिकादुदास्तेः सिप् । शंभळि कुट्टिनि ॥ २२ ॥ वंशघोषो वेणुनादः । अस्तनिद्रं विगतनिद्रं । द्वन्द्वं राधामाधवौ ॥ २३ ॥ अनेहा कालः प्रभातवेला " ऋदुशन

नयने दयिताधराद्विदूरे स्थलमीनाविव मम्लतुर्मृगाक्ष्याः ।
अपि तस्य मुखं क्षणेन जातं हृतकिञ्जल्कसरोजशोचनीयम् ॥२५॥

व्यरमत्तदुरोजकोकयूनोर्दयितासङ्गसुखं हठात्तदानीम् ।
बत नो भुवि किं किमेव भाव्यं प्रतिकूलं चलितुं विधौ प्रवृत्ते॥२६

अथ दुस्थितिरङ्गकैस्तदीयैर्द्रुतमन्योन्यशरीरविप्रयोगे ।
सुरभेरिव काप्यबष्कयिण्याः प्रतिपेदे निजवत्सदूरितायाः ॥ २७ ॥

द्रुतमेव निरेष्यतोर्निकुञ्जादनयोश्चेतसि विप्रयोगभीरौ ।
उदितौ युगपत्त्वराविलंबौ दिवि तेजस्तमसी इव क्षणेऽस्मिन् ॥२८॥

.... ॥ (७-१-९४) इत्यनङ् । दोर्वलयात् बाहुमण्डलात् आच्छिनत् आचकर्ष । रौधादिकस्य छिदेर्लङ् । अतिमुक्तलता वासन्ती "अतिमुक्तः पुण्ड्रकश्च वासन्ती" इत्यमरः ॥ २४ ॥ २५ ॥ कोकयूनोः प्रभाते विरहोऽभूदिति विस्मयः दैवे वामे सर्वं संभाव्यमेवेति । श्लेषेण समाधानम् । प्रकृते तु विधौ चन्द्रे कूलं पश्चिमाब्धितीरं प्रति चलितुं प्रवृत्ते अस्तोन्मुख इत्यर्थः ॥ २६ ॥ कापि दुस्थितिरनिर्वचनीया कष्टदशा । अबष्कयिण्या नवप्रसूतायाः "चिरसूता बष्कयणी"त्यमरः । प्रतिपेदे कर्मणि लिट् । दूरितायाः इति तत् करोतीति णिच्बाहुलकान्न दवादेशः ॥ २७ ॥ तेजस्तमसी इवेति " ईदूदेद्द्विवचनं...." इति प्रगृह्यत्वादसन्धिः ॥ २८ ॥ अनुयुक्तेति सौखशायनि-

कथमप्यथ कामिनोस्तदानीं शनकैर्निर्गमनाभिमुख्यभाजोः ।
प्रणयादनुयुक्तसुप्रभातस्वरयन्त्राळिजनोऽप्युपाससाद ॥ २९ ॥

गच्छामि गेहमयि भामिनि! साधयामी-
त्युक्ते वियोगविधुरालसपक्ष्ममालम् ।
सेर्ष्यानुरागकरुणं मुहुरर्थयन्तीम्
चेलाञ्चलोन्मुखकरां तरुणीं त्यजेत्कः ॥ ॥ ३० ॥

व्योम्नि स्वधामपरिपालनसम्मुखीनहुंकारिकौशिकनिरुद्धपथे निशान्ते।
पश्चात् पुरोऽप्यकुशलं चलितुं विलोक्य द्वन्द्वं त्रिशंकुमिव तावदवोचदाळिः

अजस्रं यस्स्वान्ते प्रतिवसति नद्धो गुणगणै-
रहो मुग्धे! तस्मादपि विरहमुद्भावयसि किम्?
इह प्रेमा यूनोर्गिरिनगरकान्तारभरितान्
प्रदेशान् प्रादेशानपि न गणयत्युद्धणरयः ॥ ३२ ॥

क इत्यर्थः ॥ २९ ॥ साधयामि गच्छामि। चेलेति वसनाग्रं जिघृक्षुः ॥ ३० ॥ प्रकृते निशान्ते प्रभाते व्योम्नि स्वनीडरक्षणाय गच्छद्भिः शब्दायमानैरुलूकैरावृते सति । त्रिशंकुपक्षे स्वधामपरिपालनसम्मुखीनाभ्यां एकस्य धाम गृहम्। अन्यस्य तेजः। हुंकारिभ्यां इन्द्राविश्वामित्राभ्यां निरुद्धपथे व्योम्न्येव निशान्ते गृहे स्थाने पश्चात् पुरोऽपि चलितुमकुशलम् । "महेन्द्रगुग्गुलूलूकव्याळग्राहिषु कौशिकः" इत्यमरः ।

मनस्विन्यः काले विधिबलपराधीनम्वारितं
विदित्वेदं विश्वं विषममपि मृष्यन्ति विरहं।
प्रतिष्ठाऽसौ पश्य प्रकढबहुरागाऽपि रजनिः
प्रतिष्ठासौ कान्ते शशिनि चलतीयं धृतिमती ॥ ३३ ॥

मितमपि हितमेतदिङ्गितज्ञा वचनमुदारमुदीर्य सा व्यरंसीत्।
तनुरपि गुळिका निहन्ति रोगं पटुभिषजो हि निदानवेदयस्य ३४॥

निहितमिव सुबीजं कालमाप्योर्वरयां फलमपुषदयत्नं तत्सुशीलोपदेशः ।
यदिह विधृतधैर्यं स्वप्रतिष्ठासमानं समजनि मिथुनं तद्राक् प्रतिष्ठासमानम्॥

कौशिको मुनिभेदे च" इति शेषश्च "धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः" इति हैमः।आळिः सखी 'सुशीला' ॥ ३१ ॥ स्वान्ते मनासि स्वसाविधे च।गुणानामेव गुणानां पाशानां गणैः । प्रादेशस्तर्जनीयुतांगुष्ठमितो देशः ॥ ३२ ॥ मनस्विन्योऽवामाः मृष्यन्ति सहन्ते। असौ प्रतिष्ठा। इयं तावल्लोकास्थितिः। प्रतिष्ठासौ प्रस्थातुमिच्छौ ॥३३॥ तनुः कृशा भिषजो गुळिका वैद्येन दत्ता गुळिका। निदानं वैद्यशास्त्रप्रसिद्धं रोगनिदानं वेत्तीति वेदयः 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेदी....,(३-१-१३८) त्यादिना वेदेःशः ॥ ३४ ॥ आप्येति आङ्पूर्वस्याप्नोतेर्ल्यप्। उर्वरा सर्वसस्याढ्या भूमिः।सुशीलायाः सख्या उपदेशः । अयत्नं अनायासं यया भवति तथा अपुषत् पुष्यतेर्लुङयङ् । स्वप्रतिष्ठासमानं स्वस्वास्थितेरनुरूपं यथा भवति तथा । प्रतिष्ठासमानं प्रस्थातुमिच्छदजनि जज्ञे।राधामाधवौ यथा यथं स्वं स्वं गृहं प्रति निवर्तितुकामा-

आश्लिष्याश्लिष्य गात्रं पुळकितमसकृद्गाढयन् बाहुबन्धा-
नाचुम्ब्याचुम्ब्य वक्त्रं मुहुरधरसुधापूरपाथेयहारी ।
आपृच्छ्यापृच्छ्य भूयः प्रणयमसृणितैर्गद्गदैरश्रु वर्षन्
मन्दं मन्दं मृगाक्षीं हरिरकृत सखीहस्तनिक्षेपमेव ॥ ३६ ॥

दैवादद्य मनोरथात् प्रियसखी लेभे चिरप्रार्थिता-
मित्यन्योऽन्यमुदीरयन्नथ निनायाऽऽळीजनो राधिकाम् ।
श्रीदाम्ना सह माधवोऽपि रजनीवृत्तान्तरोमन्थन-
प्रोन्मीलत्प्रमदोर्मिचुम्बनरसादानन्दसान्द्रो ययौ ॥ ३७ ॥

॥ इति विटविभावर्यां तुरीयो यामः ॥

अभूतामित्यर्थः । यद्यस्मान्मिथुनं प्रतिष्ठासमानमजानि तत्तस्मादुपदेशः फल-मपुष्यदिति योजना "समवप्रविभ्यः स्थः" (१-३-२२) इति तिष्ठतेः शानच् ॥ ३५ ॥ पथि साधु पाथेयं । आपृच्छ्यामन्त्र्य । निक्षेपो न्यासः ॥ ३६ ॥ इत्युदीरयान्निति । नायिकाया विरहवैधुर्यापनोदनार्थकं सखीनामिदं चाटुकौशलं । रोमन्थनं पुनः पुनः पर्यालोचनं । तत् करोतिणिजन्ताद्रोमन्थयतेर्ल्युट् । "आनन्दसान्द्रो ययौ" इति ग्रन्थान्ते मङ्गळं प्रयुक्तमिति सर्वमवदातन् ॥ ३७ ॥ शुभमस्तु ॥

इति श्रीविटविभावरीव्याख्यायां
चन्द्रिकाख्यायां तुरीयो यामः ॥

अथ ग्रन्थप्रतिष्ठाशंसा

सम्पूर्णा सारसैघैर्दिशि दिशि घटितैरुज्वलत्काव्यलक्ष्मी-
सम्पन्नक्षत्रनाथोदयमहिततरा गोविलासांस्तदीयान् ॥
अश्रान्तं तत्र तत्र प्रथयतु सरसायामयामाभिरामा
दृश्या सद्भिर्विभावर्यधिकरुचिरियं शारदोल्लासयोगात् ॥ ३८ ॥

अथ कविस्समापितस्य स्वग्रन्थस्याशिषं प्रयुक्ते द्वाभ्यां । सामिति । ग्रन्थपक्षे दिशि दिशि घटितै रसैस्सम्पूर्णा । उज्वलन्त्या काव्यलक्ष्म्या कवित्वश्रिया सम्पन्नात् क्षत्रनाथादुत्तमक्षत्रियाद्राजराजवर्मणः सकाशाद्य उदयः उत्पत्तिस्तेन महिततरा । सरसायामैरनतिविस्तीर्णतया हृद्यंगमैर्यामैः परिच्छेदैरभिरामा सद्भिर्दृश्या विबुधैर्विभाव्या शारदोल्लासयोगात् वाग्देवीविलासशालित्वात् अधिकरुचिः अध्येतृचेतोहरा । सेयं विभावरी विटविभावरीसंज्ञकमिदं काव्यं । तदीयान् क्षत्रनाथस्य कवेस्सम्बन्धिनो गोविलासान् वाग्विलासांस्तत्र तत्र प्रथयतु । रात्रिपक्षे घटितैस्संकुचितैस्सारसौघैः पद्मकदम्बकैः । काव्यः शुक्रः । नक्षत्रनाथश्चन्द्रः । सद्भिर्दृश्या ज्योतिभिः रम्या । रुचिश्शोभा । शारदोल्लासः शरत्कालसम्बन्धिविलासः । इयं विभावरी संकेतसङ्गतराधामाधवप्रणयसर्वस्वसाक्षिणी रात्रिः ॥ ३८ ॥ सर्वज्ञचूडामणिभिः विद्वच्छ्रेष्ठैः । सर्वज्ञचूडामणिना चन्द्रेण च

ग्रन्थप्रतिष्ठाशंसा

सर्वज्ञचूडामणिलाल्यमाना सूर्यादरालोकसुखप्रतीक्षा ।
विलासिमोदाय विभावरीयं जीयाच्चिरं दूरविभातशोभा

सूर्यादरालोको विद्वत्कर्तृकसादरविलोकनम् । ज्योतिरन्तरपरिभाविनो रविकिरणाश्च । दूरेति एकत्र अतिप्रकटशोभा । अन्यत्र अनासन्नप्रभाता पद्यद्वयेन च ग्रन्थसमाप्तिमङ्गलं ग्रन्थप्रतिष्ठाशंसनञ्च श्लेषभङ्ग्या कृतमिति भद्रम् ॥ ३९ ॥

इति श्रीमदुदयवर्मसूरिसार्वभौमरचिता चन्द्रिकाख्या

विटविभावरीव्याख्या

सम्पूर्णा

उदयमुदयवर्मकोलभूभृत्कुलजलराशिसुधाकराद्दधाना
स्फुरतु विटविभावरीविभागे तिमिरनिराकरणाय चन्द्रिकेयम् ॥

कवेरेवेयं स्तुतिः

॥ शुभम् ॥